# श्रीस्कन्दमहापुराणम्

# THE SKANDAMAHĀPURĀNAM

राष्ट्रिय-संस्कृत-संस्थान
नई दिल्ली

क्षेमराज श्रीकृष्णदासेन सम्पादितस्य मुम्बई श्री वेंकटेश्वरस्टीम मुद्रणालयेन प्रकाशितस्य पुनर्मुद्रणम्

# श्रीस्कन्दमहापुराणम्

# THE SKANDAMAHĀPURĀṆAM

प्रथम भाग

विषयानुक्रमणिका

श्रीमाहेश्वरखण्डम्


**राष्ट्रिय-संस्कृत-संस्थान**

मानित विश्वविद्यालय,

५६-५७ए इन्स्टिट्यूशनल एरिया, जनकपुरी, नई दिल्ली-११००५८ (भारत)

# अथ श्रीस्कान्दमहापुराणस्थविषयानुक्रमणिका प्रारभ्यते ।


अध्यायाः | विषयाः | प० | पृ०

## अथ श्रीस्कान्दे महापुराणे प्रथममाहेश्वरखण्डस्थविषयानुक्रमणिका. १

### अथ माहेश्वरखण्डे प्रथमं केदारखण्डम् ॥ ( १-१ ) ॥

१ मङ्गलाचरणम्, अथ स्कान्दमहापुराणोपक्रमः, तत्र नैमिषारण्ये शौनकादिमहर्षिदर्शनार्थं व्यासशिष्यस्य लोमशसूतमहर्षेरागमनम्, शौनकादिमहर्षिभिर्लोमशं प्रति श्रीशिवमाहात्म्यश्रवणेच्छया प्रश्नकरणम्, अथ लोमशमहर्षिणा पुराणोपक्रमपूर्वकं शिवपरममहिमोपक्रमवर्णनम्, तत्रादौ–दक्षयज्ञविध्वंसवृत्तान्तवर्णनम्, तत्र दक्षेण शिवनिंदाकरणपूर्वकं शिवाय शिवगणेभ्यश्च शापप्रदानम्, शिवशिवकिंकरशापमसहमानेन नन्दिना दक्षादिब्राह्मणेभ्यः शापप्रदानम्. अथ शङ्करेण नन्दिनः सान्त्वनम्, दक्षस्य शङ्करनिन्दनेनाऽशान्तिवर्णनम्. ... ... ... ... १ १

२ दक्षेण कनखलक्षेत्रे यज्ञकर्मप्रारम्भकरणम्, तत्र यज्ञे वसिष्ठादिमहर्षीणां विष्णुब्रह्मेन्द्रप्रभृतीनां देवतानां चागमनम्, तत्र शंकरमनागतं दृष्ट्वा दधीचिमहर्षिणा दक्षं प्रति शंकरानयनार्थमुपदेशकरणम्, दक्षेण शङ्करानादरप्रदर्शनम्, दधीचिना शंकरानादरणाऽन्यायेन यज्ञविनाशमाश्राव्य यज्ञवाटान्निर्गमनम्, दक्षेण देवयजनारम्भकरणम्, अथ गन्धमादनपर्वते विमानस्थया दाक्षायण्या सत्या स्वपितुर्दक्षस्य यज्ञसमारंभे स्वपत्नीभिः सह गच्छतश्चन्द्रस्य मुखेन यज्ञवृत्तांतं समाकर्ण्य शिवसमीपं समेत्य स्वपितृमंदिरं प्रति स्वस्या जिगमिषासमुत्कण्ठाप्रदर्शनम्, शिवेन क्रियमाणेऽप्युपदेशे सत्याऽत्याग्रहेण स्वस्या गमनार्थं शिवसकाशादाज्ञाप्रार्थनम्, पित्राऽवमानितायाः सत्याः पुनरनागमनं शिवेन निर्धार्य नन्द्यादिभिः सह तस्याः प्रेषणम्, दक्षयज्ञं प्रति सतीदेव्या गमनवर्णनम्. ... .. ... ... ... १ २

३ सतीदेव्या पितृसमीपं गत्वा भृग्वादिसंनिधौ शङ्करानाह्वानकारणे पृष्टे दक्षेण शिवनिन्दाकरणम्, शिवनिन्दामात्मापमानं चाऽसहमानया सत्या हुताशने प्रवेशकरणम्, तामनुसमागतानां द्व्ययुतगणानां शस्त्रप्रहारैः स्वांगविच्छेदेन नाशः, लोकपालादीनामृषीणां च भयेन स्तब्धीभावः, शंकरेण नारदमुखात्तं वृत्तान्तं श्रुत्वाऽतिकोपेन पर्वतशिखरोपरि निजजटास्फोटनम्, ततो वीरभद्रकालीभूतकोटिप्रादुर्भावः, रुद्रनिःश्वासतः शतसंख्याकज्वरत्रयोदशसंख्याकसंनिपातोत्पत्तिः, ततः शंकराज्ञया वीरभद्रादीनां दक्षयज्ञवाटं प्रत्यागमनम्, तामायांतीं रुद्रसेनां दृष्ट्वा यज्ञवाटास्थितानां भयात्पलायने शक्रादीनां युद्धार्थं संनहनम्, दक्षेण सर्वदेवप्रार्थनाकरणम्, विष्णुना दक्षनिर्भर्त्सनाकरणम्, कर्मफलदातृत्वेन शिवमहिमवर्णनं च. ... ... ३ १

४ वीरभद्रादिभिः सहेन्द्रादिदेवानां युद्धम्, जयचिन्तान्वितेन्द्रपृष्टबृहस्पतिकृतेन्द्रादिनिर्भर्त्सना, वीरभद्रस्य लोकपालपराजयपूर्वकं यज्ञवाटमध्य आगमनम्, ततो विष्ण्वादिदेवैः सह वीरभद्रादीनां द्वंद्वयुद्धारम्भः, शिवगणानां पराजयमदृष्ट्वा विष्णोः स्वधामगमनम्. ... .... .... ... ... ... ४ २

५ विष्णोः स्वधामगमनानन्तरं वीरभद्रादिगणैः सर्वदेवान्विजित्य भृग्वादिमहर्षिविडंबनपूर्वकं दक्षशिरश्छित्त्वा यज्ञाग्निकुण्डे होमकरणम्, सर्वेषां देवर्षिपितृयक्षराक्षसादीनां भीत्या पलायनम्, पुत्रशोकपीडितस्य ब्रह्मणः शंकरं प्रसादयितुं कैलासं प्रति गमनम्, ब्रह्मकृता शिवस्तुतिः, स्तुतिप्रसन्नेन शंकरेण सर्वदेवैः सह दक्षयज्ञमण्डपं प्रत्यागत्य दक्षकबन्धोपरि कूर्चयुक्तच्छागपशुशिरःसंयोजनपूर्वकं दक्षस्य संजीवनम्, दक्षकृता शिवस्तुतिः, स्तुतिप्रसन्नेन शिवेन दक्षायोपदेशकरणम्, शिवब्रह्मादीनां स्वस्वलोकगमनम्, लोमशेन सूतेन शिवोपासनाशिवव्रतविधिमाहात्म्यवर्णनम्,

वेश तत्सर्वं कथय प्रभो ॥ ५३ ॥ सुहृदामेष वै धर्मः सुहृद्भिः सह संगतिम् ॥ कुर्वंति यन्महादेव सुहृदां प्रीतिवर्धिनीम् ॥ ५४ ॥ तस्मात्सर्वप्रयत्नेन अनाहूतोऽपि गच्छ भोः ॥ यज्ञवाटं पितुर्मेऽद्य वचनान्मे सदाशिव ॥ ५५ ॥ तस्यास्तद्वचनं श्रुत्वा बभाषे सूनृतं वचः ॥ त्वया भद्रे न गंतव्यं दक्षस्य यजनं प्रति ॥ ५६ ॥ तस्य ये मानिनः सर्वे ससुरासुरकिंनराः ॥ ते सर्वे यजनं प्राप्ताः पितुस्तव न संशयः ॥५७॥अनाहूताश्च ये सुभ्रु गच्छंति परमन्दिरम् ॥अपमानं प्राप्नुवन्ति मरणादधिकं ततः॥५८॥ परेषां मंदिरं प्राप्त इंद्रोपि लघुतां व्रजेत् ॥ तस्मात्त्वया न गंतव्यं दक्षस्य यजनं शुभे ॥५९॥ एवमुक्ता सती तेन महेशेन महात्मना ॥ उवाच रोषसंयुक्तं वाक्यं वाक्यविदां वरा ॥ ६० ॥ यज्ञो हि सत्यं लोके त्वं स त्वं देववरेश्वर ॥ अनाहूतोऽसि तेनाद्य पित्रा मे दुष्टचारिणा ॥ तत्सर्वं ज्ञातुमिच्छामि तस्य भावं दुरात्मनः ॥६१॥ तस्माच्चाद्यैव गच्छामि यज्ञवाटं पितुर्मम ॥ अनुज्ञां देहि मे नाथ देवदेव जगत्पते ॥ ६२ ॥ इत्युक्तो भगवान्रुद्रस्तया देव्या शिवः स्वयम् ॥ विज्ञाताखिलदृग्द्रष्टा भगवान्भूतभावनः ॥ ६३ ॥ स तामुवाच देवेशो महेशः सर्वसिद्धिदः ॥ गच्छ देवि त्वरायुक्ता वचनान्मम सुव्रते ॥ ६४ ॥ एतं नंदिनमारुह्य नानाविधगणान्विता ॥ गणाः षष्टिसहस्राणि जग्मू रौद्राः शिवाज्ञया ॥ ६५ ॥ तैर्गणैः संवृता देवी जगाम पितृमंदिरम् ॥ निरीक्ष्य तद्बलं सर्वं महादेवोतिविस्मितः ॥६६॥ भूषणानि महार्हाणि तेभ्यो देव्यै परंतपः ॥ प्रेषयामास चाव्यग्रो महादेवोऽनु पृष्ठतः ॥ ६७ ॥ देव्या गतं वै स्वपितुर्गृहं तदा विमृश्य सर्वं भगवान्महेशः ॥ दाक्षायणी पित्रवमानिता सती न यास्यतीति स्वपुरं पुनर्जगौ ॥६८॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां प्रथमे माहेश्वरखण्डे केदारखंडे दक्षयज्ञं प्रति सतीदेव्यागमनवर्णनंनाम द्वितीयोऽध्यायः ॥२॥ ॥ लोमश उवाच ॥ ॥ दाक्षायणी गता तत्र यत्र यज्ञो महानभूत् ॥ तत्पितुः सदनं गत्वा नानाश्चर्यसमन्वितम्॥ १॥द्वारि स्थिता तदा देवा अवतीर्य निजासनात्॥ नंदिनो हि महाभागा देवलोकं निरीक्ष्य च ॥२॥ मातरं पितरं दृष्ट्वा सुहृत्संबंधिबांधवान् ॥ अभिवाद्यैव पितरं मातरं च मुदान्विता ॥ ३ ॥ बभाषे वचनं देवी प्रस्तावसदृशं तदा॥ अनाहूतस्त्वया कस्माच्छंभुः परमशोभनः ॥४॥ येन पूतमिदं सर्वं समग्रं सचराचरम् ॥ यज्ञो यज्ञविदां श्रेष्ठो यज्ञांगो यज्ञदक्षिणः ॥५ ॥ द्रव्यं मंत्रादिकं सर्वं हव्यं कव्यं च यन्मयम् ॥ विना तेन कृतं सर्वमपवित्रं भविष्यति ॥ ६ ॥ शंभुना हि विना तात कथं यज्ञः प्रवर्तते ॥एते कथं समायाता ब्रह्मणा सहिताः पितः ॥ ७ ॥ हे भृगो त्वं न जानासि हे कश्यप महामते॥अत्रे वशिष्ठ एकस्त्वं शक्र किं कृतमद्य ते ॥८॥ हे विष्णो त्वं महादेवं जानासि परमेश्वरम् ॥ ब्रह्मन्किं त्वं न जानासि महादेवस्य विक्रमम् ॥ ९ ॥ पुरा पंचमुखो भूत्वा गर्वितोसि सदाशिवम् ॥ कृतश्चतुर्मुखस्तेन विस्मृतोऽसि तदद्भुतम् ॥ १० ॥ भिक्षाटनं कृतं येन पुरा दारुवने

# श्रीस्कन्दमहापुराणम्

# THE SKANDAMAHĀPURĀNAM

राष्ट्रिय-सस्कृत-संस्थान
नई दिल्ली

क्षेमराज श्रीकृष्णदासेन सम्पादितस्य मुम्बई श्री वेंकटेश्वरस्टीम मुद्रणालयेन प्रकाशितस्य पुनर्मुद्रणम्

# श्रीस्कन्दमहापुराणम्

# THE SKANDAMAHĀPURĀṆAM

द्वितीय भाग

## श्रीवैष्णवखण्डम्


राष्ट्रिय-संस्कृत-संस्थान

मानित विश्वविद्यालय,

५६-५७ए इन्स्टिट्यूशनल एरिया, जनकपुरी, नई दिल्ली-११००५८ (भारत)

मे तव ॥ इत्युक्ता सा सुचार्वंगी स्वात्मानं मुनयेऽब्रवीत् ॥ ७ ॥ वियद्राजसुता ब्रह्मँल्लक्षणानि वदस्व मे ॥ इत्युक्तः स तदा प्राह नारदो मुनिसत्तमः ॥ ८ ॥ ॥ अथ नारदोदीरितपद्मावतीशरीरलक्षणानि ॥ ॥ नारद उवाच ॥ शृणु त्वं चारुवदने लक्षणानि वदामि ते ॥ पादौ प्रतिष्ठितौ सुभ्रु रक्तपद्मदलान्वितौ ॥ ९ ॥ पादांगुलयः समा रक्ता रक्ततुंगनखान्विताः ॥ गुल्फौ गूढौ समावेतौ जंघे चारोमशे शुभे ॥ १० ॥ जानुनी समसुस्निग्धे समावूरू क्रमादुरू ॥ नितंबौ पृथुलौ पीनौ जघनं चिंत्यमेव हि ॥ ११ ॥ नाभिर्मंडलवान्निम्नः पार्श्वौ ते मेदुरांवुभौ ॥ त्रिवलीलल्तिं मध्यं रोमराजिविराजितम् ॥ १२ ॥ स्तनौ पीनौ घनौ स्निग्धावुन्नतौ मग्नचूचुकौ ॥ करौ ते रक्तपद्माभौ पद्मरेखासमन्वितौ ॥ सुसूक्ष्मौ रक्तसत्पर्व निरन्तरसमांगुली ॥ १३ ॥ शुकतुंडसमाकारनखपंक्तिविराजितौ ॥ दीर्घौ च कोमलौ भद्रे भुजौ ते पुष्पदंडवत् ॥ १४ ॥ पृष्ठं ते वेदिवद्भाति विलग्नमृजु मध्यमम् ॥ कंठस्तु रक्तो दीर्घश्च स्कन्धौ चावनतौ शुभे ॥ १५ ॥ मुखं प्रसन्नं सततमकलंकशशिप्रभम् ॥ कपोलौ कनकादर्शसदृशौ कुंडलोज्ज्वलौ ॥ १६ ॥ तिलपुष्पसमाकारा नासिका ते शुभानने ॥ अकलंकाष्टमीचंद्रसदृशोऽतिमनोहरः ॥ १७ ॥ दृश्यतेऽयं ललाटस्ते नीलालकसुशोभितः ॥ मूर्धा ते समवृत्तश्च स्निग्धायतकचान्वितः ॥ १८ ॥ स्मितसंशोभिदशनं बिंबाधरसमन्वितम् ॥ मुखं ते विष्णुयोग्यं स्यादिति मे निश्चिता मतिः ॥१९॥ नाभिस्ते दक्षिणावर्त आवर्त इव गांगजः ॥ त्वं हि क्षीराब्धिसम्भूता लक्ष्मीरिव हि दृश्यसे ॥ २० ॥ ॥ श्रीवराह उवाच ॥ इत्युक्त्वा पूजितस्ताभिर्नारदोऽन्तर्दधे तदा ॥ एतच्छ्रुत्वाऽथ तत्सख्यस्तामूचुः पद्मिनीं सखीम् ॥२१॥ अथ पद्मावत्याः स्वसखीभिः साकं पुष्पाटवीगमनम् ॥ ॥ वनं गच्छाम पुष्पार्थं वसन्तः समुपागतः ॥ कार्णिकाराश्च चूताश्च चंपकाः पारिभद्रकाः ॥२२॥ पलाशाः पाटलाः कुन्दा रक्ताशोकाश्च पुष्पिताः॥ पद्मिन्यः सिन्धुवाराश्च मालत्यो यूथिकालताः॥२३॥ कह्लारकरवीराश्च संघर्षादिव पुष्पिताः ॥ पुष्पावचयनं कुर्मो वनेऽस्मिन्सुमनोहरे ॥२४॥ इत्युक्त्वा ता वनं जग्मुराकाशतनयायुताः ॥ पुष्पाण्याहरमाणास्तु विचरन्त्यस्ततस्ततः ॥ २५ ॥ कंचिद्गजेंद्रं ददृशुः शुभ्रदन्तद्वयोज्ज्वलम् ॥ गण्डभित्तितलोद्भूतमदधाराद्वयोज्ज्वलम्॥२६॥ उन्नतं करिणीयूथैः समुपेतं रजोज्ज्वलम् ॥ फूत्कारिपुष्करप्रोद्यच्छीकरापूरिताननम् ॥ २७ ॥ दृष्ट्वा चोद्विग्नहृदया वनस्पतिमुपाश्रिताः॥एतस्मिन्नंतरे चाशु ददृशुर्हयमुत्तमम्॥२८॥अथ मृगयार्थं पुष्पाटवींप्रति श्रीनिवासागमनम् ॥ अकलंकेन्दुधवलं जाम्बूनदपरिष्कृतम् ॥ स्फुरद्विद्युल्लतायुक्तशरन्मेघमिवोन्नतम् ॥ २९ ॥ तस्मिंस्तु पुरुषं कृष्णं मदनाकारवर्चसम् ॥ पुंडरीकदलाकारकर्णान्तायतलो

१ स्निग्धमेव हि–इ० पा० । २ मेचकौ–इ० पा० ।

क्षेमराज श्रीकृष्णदासेन सम्पादितस्य मुम्बई श्री वेंकटेश्वरस्टीम मुद्रणालयेन प्रकाशितस्य पुनर्मुद्रणम्

# श्रीस्कन्दमहापुराणम्

# THE SKANDAMAHĀPURĀṆAM

तृतीय भाग

## श्रीब्राह्मखण्डम्

राष्ट्रिय-संस्कृत-संस्थान
मानित विश्वविद्यालय,
५६-५७ए इन्स्टिट्यूशनल एरिया, जनकपुरी, नई दिल्ली-११००५८ (भारत)

ससैन्या वरुणालयम् ॥ ४० ॥ शतयोजनमायातं मनसापि दुरासदम् ॥ अतो नु विघ्ना बहवः कथं प्राप्या च मैथिली ॥ ४१ ॥ कष्टात्कष्टतरे प्राप्ता वयमद्य निराश्रयाः ॥ महाजले महावाते समुद्रे हि निराश्रये ॥ ४२ ॥ उपायं कं विधास्यामस्तरणार्थं वनौकसाम् ॥ राज्याद्भ्रष्टो वनं प्राप्तो हृता सीता मृतः पिता ॥ ४३ ॥ इतोऽपि दुःसहं दुःखं यत्सागरविलंघनम् ॥ धिग्धिग्गर्जितमंभोधे धिगेतां वारिराशिताम् ॥ ४४ ॥ कथं तद्वचनं मिथ्या महर्षेः कुम्भजन्मनः ॥ हत्वा त्वं रावणं पापं पवित्रे गंधमादने ॥ पापोपशमनायाशु गच्छस्वेति यदीरितम् ॥४५॥ ॥ श्रीसूत उवाच ॥ ॥ इति रामवचः श्रुत्वा सुग्रीवप्रमुखास्तदा ॥ ४६ ॥ ऊचुः प्रांजलयः सर्वे राघवं तं महाबलम् ॥ नौभिरेनं तरिष्यामः प्लवैश्च विविधैरिति ॥ ४७ ॥ मध्ये वानरकोटीनां तदोवाच बिभीषणः ॥ समुद्रं राघवो राजा शरणं गन्तुमर्हति ॥ ४८ ॥ खनितः सागरैरेष समुद्रो वरुणालयः ॥ कर्तुमर्हति रामस्य तज्ज्ञातेः कार्यमंबुधिः ॥ ४९ ॥ बिभीषणेनैवमुक्तो राक्षसेन विपश्चिता ॥ सांत्वयन्राघवः सर्वान्वानरानिदमब्रवीत् ॥ ५० ॥ शतयोजनविस्तारमशक्ताः सर्ववानराः ॥ तर्तुं प्लवोडुपैरेनं समुद्रमतिभीषणम् ॥ ५१ ॥ नावो न संति सेनाया बह्व्या वानरपुंगवाः ॥ वणिजामुपघातं च कथमस्मद्विधश्चरेत् ॥ ५२ ॥ विस्तीर्णं चैव नः सैन्यं हन्याच्छिद्रेषु वा परः ॥ प्लवोडुपप्रतारोऽतो नैवात्र मम रोचते ॥ ५३ ॥ बिभीषणोक्तमेवेदं मोदते मम वानराः ॥ अहं त्विमं जलनिधिमुपास्ये मार्गसिद्धये ॥ ५४ ॥ नो चेद्दर्शयिता मार्गं धक्ष्याम्येनमहं तदा ॥ महास्त्रैरप्रतिहतैरत्यग्निपवनोज्ज्वलैः ॥ ५५ ॥ इत्युक्त्वा सहसौमित्रिरुपस्पृश्याथ राघवः ॥ प्रतिशिश्ये जलनिधिं विधिवत्कुशसंस्तरे ॥ ५६ ॥ तदा रामः कुशास्तीर्णे तीरे नदनदीपतेः ॥ संविवेश महाबाहुर्वेद्यामिव हुताशनः ॥ ५७ ॥ शेषभोगनिभं बाहुमुपधाय रघूद्वहः ॥ दक्षिणो दक्षिणं बाहुमुपास्ते मकरालयम् ॥ ५८ ॥ तस्य रामस्य सुप्तस्य कुशास्तीर्णे महीतले ॥ नियमादप्रमत्तस्य निशास्तिस्रोऽतिचक्रमुः ॥ ५९ ॥ स त्रिरात्रोषितस्तत्र नयज्ञो धर्मतत्परः ॥ उपास्तेस्म तदा रामः सागरं मार्गसिद्धये ॥ ६० ॥ न च दर्शयते मन्दस्तदा रामस्य सागरः ॥ प्रयतेनापि रामेण यथार्हमपि पूजितः ॥ ६१ ॥ तथापि सागरो रामं न दर्शयति चात्मनः ॥ समुद्राय ततः क्रुद्धो रामो रक्तांतलोचनः ॥ ६२ ॥ समीपवर्तिनं चेदं लक्ष्मणं प्रत्यभाषत ॥ अद्य मद्बाणनिर्भिन्नैर्मकरैर्वरुणालयम् ॥ ६३ ॥ निरुद्धतोयं सौमित्रे करिष्यामि क्षणादहम् ॥ सशंखशुक्ताजालं हि समीनमकरं शनैः ॥ ६४ ॥ अद्य बाणैरमोघास्त्रैर्वारिधिं परिशोषये ॥ क्षमया हि समायुक्तं मामयं मकरालयः ॥ ६५ ॥ असमर्थं विजानाति धिक्क्षमामीदृशे

१ सखायस्ते--इ० पा० । २ वरुणालयम्--इ० पा० ।

क्षेमराज श्रीकृष्णदासेन सम्पादितस्य मुम्बई श्री वेंकटेश्वरस्टीम मुद्रणालयेन प्रकाशितस्य पुनर्मुद्रणम्

# श्रीस्कन्दमहापुराणम्

# THE SKANDAMAHĀPURĀṆAM

## चतुर्थ भाग

## काशीखण्डम्

राष्ट्रिय-संस्कृत-संस्थान
मानित विश्वविद्यालय,
५६-५७ए इन्स्टिट्यूशनल एरिया, जनकपुरी, नई दिल्ली-११००५८ (भारत)

मिकार्तिकेयेगच्छतितद्वारणायकारिगणेशानाननामिते ॥ अत्रसमासनिष्ठस्यार्भकपदस्यविशेष्यत्वंछांदसम् ॥ तत्कथ्यतांमहाभागयदिविष्णुकथाश्रयम् अथवास्यपदांभोजमकरन्दलिहांसता
मिति तथाप्राचीनबर्हिर्भगवान्पाताळतलचारिणः समुद्रतनयायातुकृतदारोऽभवत्प्रभुरितीत्यादिवद्बोद्धव्यम् ॥ अनामयंनविद्यतेआमयोरोगमात्रंयस्मात्तंसर्वरोगनाशकंसूर्यविरंचिनारायणशंकरा
त्मकम् ॥ आरोग्यंभास्करादिच्छेदितिवचनादित्यर्थः ॥ १ ॥ एवंविघ्नाधिराजंप्रपूज्यजगन्निःश्रेयसमाशासानःपुराणार्थाश्रयभूतमविमुक्तंप्रस्तौति ॥ भूमिष्ठेति ॥ साकाशीअपायाज्जगत्पायादि
त्यन्वयः ॥ सेतिप्रसिद्धेत्यर्थः ॥ प्रसिद्धत्वंचास्याःसोऽविमुक्तेउपास्योयएषोऽनंतोऽव्यक्तआत्मासोऽविमुक्तेप्रतिष्ठितइत्याद्ययाश्रुत्याबोद्धव्यम् ॥ अविमुक्तंकाशीत्यनर्थांतरम् ॥ तत्त्वग्रेवक्ष्याति ॥
काशीति ॥ अनाख्येयंस्वप्रकाशंचैतन्यंप्रकाशतेस्यामितिकाशी ॥ तथाचवक्ष्याति ॥ काशतेऽत्रयतोज्योतिस्तदनाख्येयमीश्वरः ॥ अतोनामापरं चास्तु काशीति प्रथितं प्रभो ॥ यद्वा काशंतेराजंते
स्वप्रकाशतयाऽस्यांतनुत्यागमात्रेणप्राणिनइतिकाशी ॥ एतदप्युक्तमत्रैव ॥ कीटाःपतंगामशकाश्ववृक्षाजलेस्थलेयेविचरंतिजीवाः ॥ मंडूकमत्स्याःकृमयोपिकाश्यांत्यक्त्वाशरीरंशिवमाप्नुवंतीत्यादि ॥
अत एवोक्तंअपायाज्जगत्पायादिति ॥ अपगतोऽयनमयोज्ञानम् ॥ सर्वेगत्यर्थाज्ञानार्थाइतिन्यायाद्यस्मान्नित्यपायमज्ञानंतत्कार्यंतस्मात् ॥ गच्छतिजन्मादिषड्भावविकारान्प्राप्नोति ॥ सर्वेगत्यर्थाः
प्राप्त्यर्थाइतिन्यायाज्जगत्समष्टिव्यष्टिजीवजातमित्यर्थः ॥ पायान्मोचयत्वित्यर्थः ॥ यद्वासर्वाभ्योऽयोध्यादिपुरीभ्योऽधिकतयाकाशतेराजतइतिकाशी ॥ वक्ष्यातिहि । अन्यानिपुण्यक्षेत्राणि
काशीप्राप्तिकराणिवै । काशींप्राप्यविमुच्येतनान्यथाकल्पकोटिभिरिति ॥ अधिकत्वेजगन्मोचकत्वेचहेतुंवदन्विरोधाभासालंकारलक्षणैश्चतुर्भिर्विशेषणैर्विशिनष्टि ॥ भूमिष्ठेत्यादियस्यांमृतजंतवइत्यं

भूमिष्ठापिनयात्रभूस्त्रिदिवतोप्युच्चैरधःस्थापियायाबद्धाभुविमुक्तिदास्युरमृतंयस्यांमृताजंतवः ॥
यानित्यंत्रिजगत्पवित्रतटिनीतीरेसुरैःसेव्यतेसाकाशीत्रिपुरारिराजनगरीपायादपायाज्जगत् ॥ २ ॥

तेन ॥ भूमिष्ठापिनयात्रभूरितिविरोधाभासःसर्वत्रस्पष्टएव ॥ भूमौतिष्ठतीतिभूमिष्ठा ॥ अंबांबगोभूमिसव्येत्यादिनाषत्वम् ॥ भूमिष्ठत्वेनभूम्यवयवत्वेनायोध्यादिक्षेत्रवत्प्रतीयमानापियाकाशीअत्रभूमौ
भूर्नभवति भूम्यधिकरणिकाभूर्नभवति भूमौनतिष्ठतीतियावत्॥अन्यैवेयंकाचिद्भूरित्यर्थः॥ईश्वरस्यत्रिशूलाग्रेस्थितत्वात् ॥ वक्ष्यातिच ॥ क्षेत्रमेतत्त्रिशूलाग्रेशूलिनास्तिष्ठतिद्विज अन्तरिक्षेनभूमिष्ठंनेक्षंते
मूढबुद्धयःभूर्लोकेनचसंलग्नमंतरिक्षेममालयम् विमूढास्तंनपश्यंतियुक्ताःपश्यंतिचेतसेत्यादि ॥ त्रिदिवतोप्युच्चैरधःस्थापियेति॥अधस्तिष्ठतीत्यधःस्थाभुवर्लोकादीनांषण्णांमध्यस्थापियाकाशीत्रिदिवतोप्यु
च्चैस्त्रिदिवतोप्युपरितिष्ठतीत्यर्थः ॥ प्रलयसमयएवत्रिशूलाग्रेणोर्ध्वीकृत्यविश्वनाथेनधृतत्वात् ॥ तत्रदैनंदिनप्रलयेत्रिदिवतःस्वर्लोकादित्येव ॥ प्राकृतप्रलयेतुत्रयोब्रह्मविष्णुमहेश्वरादीव्यंतिक्रीडं
त्यस्मिन्नितित्रिदिवंब्रह्मांडंतस्मादितिव्याख्येयम्॥तथाचवक्ष्याति॥अहोजनानांजडताविहायकाशींयदन्यत्रनयंतिचेतः ॥ परिस्फुरद्गांगजलाभिरामांकामारिशूलाग्रधृतांलयेपि॥महासंवर्तसंवृत्ततापाद्विश्वे
शपालिताम् स्वर्धुन्याहारयष्ट्येवराजितांकण्ठभूमिषु ॥ सनत्कुमारसंहितायांच ॥ गतेपरार्द्धद्वितयेविलीनेजगत्यशेषेमयिदेविसर्वे रक्षंतिसर्वैर्विविधायुधौघैर्वाराणसींकाशितसूक्ष्मसिद्धिमिति ॥ ननुदैनंदिन
प्रलयेत्रिशूलाग्रेणमहेशेनोर्ध्वीकृत्यधृतत्वात्कथंचित्काशीतिष्ठतुनाम प्राकृतेतुप्रलयेप्रकृतिकार्यमात्रस्यसर्वस्यविलयात्कथंकाशीतिष्ठेत्कुतस्तरांगणाःकुतस्तमांत्रिशूलमिति ॥ किंचधर्त्तुर्विश्वनाथस्या
प्यभावःश्रूयते ॥ तथाचोक्तवान्वासिष्ठेभगवान्रामः ॥ परमेष्ठ्यपिनिष्ठावान्हियतेहरिरप्यजः भवोप्यभावमायातिकैवास्थामादृशेजनेइति ॥ तस्मात्तदेतत्सर्वमर्थवादमात्रमिति न भूर्लोकेनचसंलग्नंतत्क्षे

क्षेमराज श्रीकृष्णदासेन सम्पादितस्य मुम्बई श्री वेंकटेश्वरस्टीम मुद्रणालयेन प्रकाशितस्य पुनर्मुद्रणम्

# श्रीस्कन्दमहापुराणम्

# THE SKANDAMAHĀPURĀṆAM

## पञ्चम भाग

## श्रीआवन्त्यखण्डम्

## श्रीरेवाखण्डम्

**राष्ट्रिय-संस्कृत-संस्थान**

मानित विश्वविद्यालय,
५६-५७ए इन्स्टिट्यूशनल एरिया, जनकपुरी, नई दिल्ली-११००५८ (भारत)

षां सदाऽक्षयः ॥ तत्र यद्दीयते दानं त्रुटिमात्रं तु कांचनम् ॥ १० ॥ अक्षयं तस्य तत्प्रोक्तं ब्रह्मणा वै स्वयंभुवा ॥ गंगाद्वारे प्रयागे च कुरुक्षेत्रेऽथ पुष्करे ॥ ११ ॥ वाराणस्यां गयायां च सा न तृप्तिर्भविष्यति ॥ तुष्टाश्च पितरो नृणां दास्यंति कांक्षितान्वरान् ॥ १२ ॥ यो यमुद्दिश्य वै काममिह श्राद्धं करिष्यति ॥ तस्य तज्जायते सर्वं मृतस्य परमा गतिः ॥ १३ ॥ नवमी अष्टमी चैव अमावास्याथ पूर्णिमा ॥ सर्वाण्येतानि वै व्यास रवेः संक्रम एव च ॥ १४ ॥ ब्रह्मेंद्ररुद्रदेवांश्च सूर्याग्निब्रह्मदैवतान् ॥ विश्वेदेवान्सगन्धर्वान्यक्षांश्च मनुजान्पशून् ॥ १५ ॥ सरीसृपान्पितृगणान्यच्चान्यद्भुवि संस्थितम् ॥ श्राद्धं वै श्रद्धया कुर्वन्प्रीणयत्यखिलं जगत् ॥ १६ ॥ मासिमास्यसिते पक्षे पंचदश्यां द्विजोत्तम ॥ इन्दुक्षये यदा मैत्रं विशाखां चैव रोहिणीम् ॥ १७ ॥ श्राद्धे पितृगणास्तृप्तिं प्रयांति पितरोऽर्जिताम् ॥ वासवाजैकपादर्क्षे पितॄणां तृप्तिमिच्छता ॥ १८ ॥ भक्त्या श्राद्धं प्रकर्तव्यं पितरस्तेन तर्पिताः ॥ अपि धन्याः कुले जाता अस्माकं मतिशालिनः ॥ १९ ॥ ये कुर्वंति च वै श्राद्धं पिंडान्ये निर्वपंति च ॥ तेन पिंडप्रदानेन तृप्तिर्नो भविताऽक्षया ॥ २० ॥ इहैत्य वै पुण्यजलेषु सम्यक्स्नात्वा नरस्तांस्तु लभेत कामान् ॥ यान्प्राप्य च प्रेतगणैः समेतः स मोदते देववृतोऽथ सिद्धः ॥ २१ ॥ चित्तं च वित्तं च नृणां च शुद्धं शस्तश्च कालः कथितो विधिश्च ॥ पात्रं यथोक्तं परमा च भक्तिर्नृणां प्रयच्छंति हि वांछितानि ॥ २२ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये नीलगन्धवतीप्रभाववर्णनंनाम षोडशोऽध्यायः ॥ १६ ॥ छ ॥ ॥ सनत्कुमार उवाच ॥ ॥ दशाश्वमेधिके स्नात्वा दृष्ट्वा देवं महेश्वरम् ॥ दशानामश्वमेधानां फलं प्राप्नोति मानवः ॥ १ ॥ मनुना मानवेन्द्रेण राज्ञा चैव ययातिना ॥ रघुणोशनसा चैव लोमशेन महर्षिणा ॥ २ ॥ अत्रिणा भृगुणा व्यास दत्तात्रेयेण धीमता ॥ पुरूरवसा पुण्येन नहुषेण नलेन च ॥ ३ ॥ अत्र स्नानेन संप्राप्तं दशाश्वमेधिकं फलम् ॥ संप्राप्ते द्वापरस्यांते राज्ञा बाष्कलिना तथा ॥ ४ ॥ दशानामश्वमेधानां फलं प्राप्तं द्विजोत्तम ॥ कृष्णवर्णं तथा लिंगं पूजितं भक्तितः सदा ॥ ५ ॥ दृष्ट्वा स्पृष्ट्वा च तं देवं प्रागुक्तं लभते फलम् ॥ चैत्रे मासि सिताष्टम्यां देवं संपूज्य भक्तितः ॥ ६ ॥ अश्वं दद्याच्च विप्राय सुरूपं च गुणान्वितम् ॥ यावंति तस्य रोमाणि गण्यंते संख्यया द्विज ॥ ७ ॥ तावद्वर्षसहस्राणि शिवलोके महीयते ॥ शिवलोकात्परिभ्रष्टः सार्वभौमो भवेद्भुवि ॥ ८ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चम आवन्त्यखण्डेऽवन्तीक्षेत्रमाहात्म्ये दशाश्वमेधमाहात्म्यवर्णनंनाम सप्तदशोऽध्यायः ॥ १७ ॥छ॥ ॥ सनत्कुमार उवाच ॥ ॥ एकानंशां नमस्कृत्य

१ प्रतिमाश्च ये–इ० पा० । २ स्वर्गलोके–इ० पा० ।

क्षमराज श्रीकृष्णदासेन सम्पादितस्य मुम्बई श्री वेंकटेश्वरस्टीम मुद्रणालयेन प्रकाशितस्य पुनर्मुद्रणम्

# श्रीस्कन्दमहापुराणम्

# THE SKANDAMAHĀPURĀṆAM

षष्ठम भाग

## नागरखण्डम्

राष्ट्रिय-संस्कृत-संस्थान
मानित विश्वविद्यालय,
५६-५७ए इन्स्टिट्यूशनल एरिया, जनकपुरी, नई दिल्ली-११००५८ (भारत)

मरणवर्जितम् ॥ १३४ ॥ इति श्रीस्कांदे महापुराण एकाशीतिसाहस्र्यां संहितायां षष्ठे नागरखण्डे हाटकेश्वरक्षेत्रमाहात्म्ये वृत्रवधवर्णनंनामाष्टमो ऽध्यायः ॥ ८ ॥ ७ ॥ ॥ सूत उवाच ॥ ॥ अथ शक्रः समाहूय प्रोचे संवर्तकानिलम् ॥ हाटकेश्वरजे क्षेत्रे महान्नागबिलोऽस्ति वै ॥ १ ॥ तं पूरय ममादेशाद्द्रुतं गत्वाऽभिपांसुभिः ॥ येन न स्याद्गतिस्तत्र कस्यचिन्मृत्युधर्मिणः ॥२॥ ॥ वायुरुवाच ॥ ॥ तवादेशान्मया पूर्वं पूरितो विवरो यदा ॥ लिंगोद्भवस्तदा शापः प्रदत्तो मे पुरारिणा ॥ ३ ॥ यस्माल्लिंगं ममैतद्धि त्वया पांसुभिरावृतम् ॥ तस्मात्समानधर्मा त्वं गन्धवाहो भविष्यसि ॥ ४ ॥ यद्वत्कर्पूरजं गन्धं समग्रं त्वं हि वक्ष्यसि ॥ अमेध्यसंभवं तद्वन्मम वाक्यादसंशयम् ॥५॥ तस्मात्कुरु प्रसादं मे विदित्वैतत्सुरेश्वर ॥ कृत्येऽस्मिन्स्मयंतामन्यस्त्रिपुरारेर्बिभेम्यहम् ॥६॥ ततः संचिंतयामास पूरणं त्रिदशाधिपः ॥ तस्य नागबिलस्यैव नैव किंचिदवैक्षत ॥७॥ ततस्तं प्राह देवेज्यः स्वयमेव शतक्रतुम् ॥ कस्मात्त्वं व्याकुलीभूतः कृत्येऽस्मिंस्त्रिदशाधिप ॥ ८ ॥ अस्ति पर्वतमुख्योऽत्र नाम्ना ख्यातो हिमालयः ॥ तस्य पुत्रत्रयं जातं तच्च शक्र शृणुष्व मे ॥ ९ ॥ मैनाकः प्रथमः प्रोक्तो द्वितीयो नंदिवर्धनः ॥ रक्तशृंगस्तृतीयस्तु पर्वतः परिकीर्तितः ॥ १० ॥ स मैनाकः समुद्रांतः प्रविष्टः शक्र ते भयात् ॥ पक्षाभ्यां सहितोऽद्यापि स तत्रैव व्यवस्थितः ॥ ११ ॥ नंदिवर्धन इत्येषं द्वितीयः परिकीर्तितः ॥ वसिष्ठाश्रमजो रन्ध्रस्तेन कृत्स्नः प्रपूरितः ॥ १२ ॥ हिमाचलसमादेशाद्वसिष्ठस्य च सन्मुनेः ॥ देवभूमिं परित्यज्य स गतस्तत्र सत्वरम् ॥ १३ ॥ तृतीयस्तिष्ठतेऽद्यापि रक्तशृंगः स्मृतोऽत्र यः ॥ तमानय सहस्राक्ष बिलं सार्पं प्रपूरय ॥ १४ ॥ नान्यथा पूरितुं शक्यो बिलोऽयं त्रिदशाधिप ॥ तं मुक्त्वा पर्वतश्रेष्ठं सत्यमेतन्मयोदितम् ॥ १५ ॥ ॥ सूत उवाच ॥ तच्छ्रुत्वा देवपूज्यस्य वचनं त्रिदशाधिपः ॥ जगाम सत्वरं तत्र स यत्रास्ते हिमालयः ॥ ॥ १६ ॥ ततः प्रोवाच तं गत्वा सामपूर्वमिदं वचः ॥ हिमाचलं गिरिश्रेष्ठं सिद्धचारणसेवितम् ॥ १७ ॥ ॥ इन्द्र उवाच ॥ ॥ हाटकेश्वरजे क्षेत्रे महान्नागबिलः स्थितः ॥ तेन गत्वा नरा देवं पाताले हाटकेश्वरम् ॥ १८ ॥ पूजयिष्यंति ये केचिदपि पापपरायणाः ॥ मया सार्धं करिष्यंति ततः स्पर्द्धां नगोत्तम ॥ १९ ॥ तस्मात्पुत्रमिमं तत्र रक्तशृंगं हिमालय ॥ प्रेषयस्व बिलो येन पूर्यते सोऽहिसंभवः ॥ २० ॥ कुरुष्व त्वं ममातिथ्यं गृहप्राप्तस्य पर्वत ॥ आत्मपुत्रप्रदानेन कीर्तिं प्राप्स्यस्यलौकिकीम् ॥ २१ ॥ बाढमित्येव सोऽप्युक्त्वा पूजयित्वा च देवपम् ॥ ततः प्रोवाच तं पुत्रं रक्तशृंगं हिमालयः ॥ २२ ॥ तवार्थाय सहस्राक्षः पुत्र प्राप्तो ममांतिकम् ॥ तस्माद्गच्छ द्रुतं तत्र यत्र नागबिलः स्थितः ॥ २३ ॥ पूरयित्वा

१ एव–इ० पा० । २ शतक्रतुर्हिमाचलम्–इ० पा० ।

क्षेमराज श्रीकृष्णदासेन सम्पादितस्य मुम्बई श्री वेंकटेश्वरस्टीम मुद्रणालयेन प्रकाशितस्य पुनर्मुद्रणम्

# श्रीस्कन्दमहापुराणम्

# THE SKANDAMAHĀPURĀṆAM

## सप्तम भाग

## श्रीप्रभासखण्डम्

राष्ट्रिय-संस्कृत-संस्थान
मानित विश्वविद्यालय,
५६-५७ए इन्स्टिट्यूशनल एरिया, जनकपुरी, नई दिल्ली-११००५८ (भारत)

वरानने ॥ ४२ ॥ तन्मे स्थानं महादेवि कैलासादपि वल्लभम् ॥ गोचर्ममात्रं तत्रापि महागोप्यं वरानने ॥ ४३ ॥ अकथ्यं देवदेवेशि तव स्नेहात्प्रकाशितम् ॥ एतत्प्राभासिकं क्षेत्रं प्रभया दीपितं मम ॥ ४४ ॥ तेन प्रभासमित्युक्तमादिकल्पे वरानने ॥ द्वितीये तु प्रभा लब्धा सर्वैर्देवैः सवासवैः ॥ ४५ ॥ मम प्रभाभा देवेशि तेन प्राभासिकं स्मृतम् ॥ प्रभाववन्तो देवेशि यत्र संति महासुराः ॥ ४६ ॥ अथवा तेन लोकेषु प्रभासमिति कीर्त्यते ॥ प्रथमं भासते देवि सर्वेषां भुवि तेजसाम् ॥ तीर्थानामादितीर्थं यत्प्रभासं तेन कीर्त्तितम् ॥ ॥ ४७ ॥ प्रकृष्टं भानुरथवा भासितो विश्वकर्मणा ॥ यत्र साक्षात्प्रभापातो जातः प्राभासिकं ततः ॥ ४८ ॥ अथवा दक्षसंशप्तेनेन्दुना निष्प्रभेण च ॥ तत्र देवि प्रभा लब्धा तेन प्राभासिकं स्मृतम् ॥ प्रोदध्रे भारती देवी ह्यौर्वाग्निं वडवानलम् ॥ ४९ ॥ अथवा तेन देवेशि प्रभासमिति कीर्त्यते ॥ प्रकृष्टा भारती ब्राह्मी विप्रोक्ता श्रूयतेऽध्वनि ॥ सदा यत्र महादेवि प्रभासं तेन कीर्तितम् ॥ ५० ॥ प्रोल्लसद्वीचिभिर्भाति सर्वदा सागरः प्रिये ॥ तेन प्रभासनामेति त्रिषु लोकेषु विश्रुतम् ॥ ५१ ॥ प्रत्यक्षं भास्करो यत्र सदा तिष्ठति भामिनि ॥ तेन प्रभासनामेति प्रसिद्धिमगमत्क्षितौ ॥ ५२ ॥ प्रकृष्टं भाविनां सर्वं कामं तत्र ददाम्यहम् ॥ तेन प्रभासनामेति तीर्थं त्रैलोक्यविश्रुतम् ॥ ५३ ॥ कल्पभेदेन नामानि तथैव सुरसुन्दरि ॥ निरुक्तभेदैर्बहुधा भिद्यंते[1] कारणैः प्रिये ॥ प्रभासमिति यन्नाम दातव्यं निश्चलं स्मृतम् ॥ ५४ ॥ अत्रत्त्वे संस्थितं देवि विष्णोराद्यकलेवरे ॥ इति ते कथितं देवि संक्षेपात्क्षेत्रकारणम् ॥ ५५ ॥ पुनस्ते कथयाम्यद्य यत्पृच्छसि वरानने ॥ तद्ब्रूहि शीघ्रं कल्याणि यत्ते मनसि वर्तते ॥ ५६ ॥ ॥ देव्युवाच ॥ ॥ अस्मिन्कल्पे यथा जातं क्षेत्रं प्राभासिकं हर ॥ तन्मे विस्तरतो ब्रूहि उत्पत्तिं कारणं तथा ॥ ५७ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि यथावत्क्षेत्रकारणम् ॥ यच्छ्रुत्वा मानवो भक्त्या मुच्यते सर्वपातकैः ॥ ५८ ॥ आदिक्षेत्रस्य माहात्म्यं रहस्यं पापनाशनम् ॥ कथयिष्ये वरारोहे तव स्नेहेन भामिनि ॥ ५९ ॥ अस्मिन्कल्पे तु यद्देवि आदावेव वरानने ॥ स्वायंभुवे मनौ तत्र ब्रह्मणः सृजतः पुरा ॥ ६० ॥ दक्षिणाल्लोचनाज्जातः पूर्वं सूर्य इति प्रिये ॥ ततः कालान्तरे तस्य भार्ये द्वे च बभूवतुः ॥ ६१ ॥ तयोस्तु राज्ञी द्यौर्ज्ञेया निक्षुभा[2] पृथिवी स्मृता ॥ सौम्यमासस्य[3] सप्तम्यां द्यौः सूर्येण च युज्यते ॥ ६२ ॥ माघमासे तु सप्तम्यां मह्या सह भवेद्रविः ॥

१ विद्यंते–इ० पा० । २ निक्षुधा–इ० पा० । अत्रे च निक्षुधाशब्दस्य निरुक्तिः कृताऽस्ति परं तु निक्षुभाशब्द एव सर्वत्र दृश्यते अतः–'निक्षुभा' एव–निक्षुधाशब्देनाप्युच्यते योगरूढिबलेनेति बोध्यम् । क्षुधक्षुभोः प्रायोऽर्थसामीप्यात् । ३ सौम्यमासस्य–मार्गशीर्षमासस्य–इत्यर्थः ।

क्षेमराज श्रीकृष्णदासेन सम्पादितस्य मुम्बई श्री वेंकटेश्वरस्टीम मुद्रणालयेन प्रकाशितस्य पुनर्मुद्रणम्

# श्रीस्कन्दमहापुराणम्

# THE SKANDAMAHĀPURĀṆAM

## अष्टम भाग

डॉ॰ राजेन्द्रनाथ शर्मणा भूमिका

एवं श्री नागशरण सिंह श्लोकानुक्रमण्या सहितम्।

राष्ट्रिय-संस्कृत-संस्थान
मानित विश्वविद्यालय,
५६-५७ए इन्स्टिट्यूशनल एरिया, जनकपुरी, नई दिल्ली-११००५८ (भारत)

# श्रीस्कन्दमहापुराणम् :: श्लोकानुक्रमणी

## प्रथम माहेश्वरखण्डम्

१.१ — केदारखण्डम्
१.२ — कौमारिकाखण्डम्
१.३.१ — अरुणाचलमाहात्म्यम् (पूर्वार्ध)
१.३.२ — अरुणाचलमाहात्म्यम् (उत्तरार्ध)

## द्वितीय वैष्णवखण्डम्

२.१ — वेंकटाचलमाहात्म्यम्
२.२ — पुरुषोत्तम (जगन्नाथ) क्षेत्रमाहात्म्यम्
२.३ — बदरिकाश्रममाहात्म्यम्
२.४ — कार्तिकमासमाहात्म्यम्
२.५ — मार्गशीर्षमाहात्म्यम्
२.६ — भागवतमाहात्म्यम्
२.७ — वैशाखमासमाहात्म्यम्
२.८ — अयोध्यामाहात्म्यम्

## तृतीय ब्राह्मखण्डम्

३.१ — सेतुमाहात्म्यम्
३.२ — धर्मारण्यखण्डम्
३.३ — ब्राह्मोत्तरखण्डम्

आत्ममूर्त्तौं प्रविष्टां ७.२.९.४०
आत्मशक्तिं तत्रमुक्त्वा १.२.६२.७
आत्मंशक्तिप्रभावेन ६.१७२.२
आत्मशक्तया प्रदद्याच्य २.२.४९.२७
आत्म श्रेणिप्रसूताय ६.१२५.२७
आत्मसंबंधिनं कृत्वा २.२.२३.४५
आत्मसंभावितो मूढः १.१.२.२८
आत्मसैन्ये हते ३.१.७.१५
आत्मसौख्यकराः पापा २.७.२४.९१
आत्मस्वरूपतवरूप ४.१६.१०८
आत्महा भ्रूणहा स्त्रीहा ७.२.६.११९
आत्माघातोन कर्तव्य ४.१२.१३
आत्मा च पार्थिवश्रेष्ठ ७.३.४८.३६
आत्मा चेति क्रमाञ्ज्ञेया ७.१.८७.१७
आत्मा च सततं पुत्र ७.३.२९.७३
आत्मा चैव क्रियाशक्तिः ३.३.१६.४४
आत्मा तु राधिका तस्य २.६.१.२२
आत्मात्मा चाक्षरात्मा २.९.१९.२१
आत्मानं कन्यया दत्तं ५.३.८३.९०
आत्मानं च गणैः सार्द्धं १.१.१०.४०
आत्मानं च तदन्तः २.६.३.६९
आंत्मानं च महेशेन ५.१.३६.३३
आत्मातं चापि देवाय १.२.२६.७९
आत्मानं चापि मेने ३.२.३३.३०
आत्मानं तोलयेद्यस्तु ५.१.८.६७
आत्मानं तोलयेद्यस्तु ७.४.८.१६
आत्मानं ददृशे राजा २.२.११.४५
आत्मानं नरकात्त्रातुं ६.९७.४०
आत्मानं परमात्मानं १.१.२६.१३
आत्मानं पातके विष्टं १.२.६.११६
आत्मानं पूर्वजैः सार्द्धं ६.२३५.३२
आत्मानं बहुधा निंद १.२.४६.११४
आत्मानंबहुमन्येहं ४.५४.५१
आत्मानं भूषणस्थाने १.२.२६.१६
आत्मानं मन्यते शुद्धं ५.३.४९.१८
आत्मानं वंचितं ज्ञात्वा ५.३.१५५.२९
आत्मानं वा नियुञ्जीत २.१.२२.४८
आत्मानं सह याज्येन ५.३.८५.७२
आत्मानं हंतुमायाति ३.१.३३.२७
आत्मानं हि पणीकृत्य ५.१.६९.५२
आत्मानंदानुभ्रूत्यैव १.२.४२.१८९
आत्मानंपावयुद्विद्वान् ४.३५.१०५
आत्मानपि दास्यामि ७.४.१९.८
आत्मानमसुतं ज्ञात्वा ३.१.५.५८
आत्मानमात्मनैवाथब्रह्म ६.१२८.३
आत्मानमात्मात्मतया १.१.१४.१५३
आत्मा पुत्र त्वया रक्ष्यः ६.५१.२५
आत्मा पुनाति पापानि १.२.४५.४५
आत्मा पुराणं वेदानां ५.३.१.२२
आत्मा प्रख्यातिमानेयः १.२.५९.७०
आत्मा राज्यं धनं २.९.५.२१
आत्मारामस्य कृष्ण २.६.२.११
आत्मारामो जितक्रोधो ३.३.१५.४
आत्मार्थं किं याचनीयं २.४.९.५१
आत्मार्थंजीवलोकेस्मिन् ४.४७.३६
आत्मार्थंनोद्यमश्चायं ४.५०.९९
आत्मार्थंपायसमसोपयं ४.२८.६९
आत्मावबोधमहसः किम ४.११.१२३
आत्मावलोकनं भावि ६.१८५.५५
आत्मावलोकनार्थाय ३.१.२९.२१
आत्मावलोकनार्थाय ६.१८५.५४
आत्मा वै पुत्ररूपेण ३.१.१९.३७
आत्मास्य कथितो ब्रह्मा १.२.३७.१३
आत्माहारप्रमाणेन ७.२.१३.२८
आत्माहाराच्चतुर्भागं ७.२.१३.२७
आत्मीयं कुत्सितं तेषां ६.१६२.२
आत्मीयं पितरं मुक्त्वा ७.२.१८.८०
आत्मीयैं हेम चादाय ६.१६२.४
आत्मीयमपि सा देवी १.२.३९.१६५
आत्सीये जीविते ब्रह्मा ६.२७२.५५
आत्मोत्सवरूपत्वं हरिणा २.६.२.२५
आत्मोपमश्च भूतेषु ५.३.२२७.३१
आत्मोपलब्धिविज्ञेयं ७.१.६.१२
आमोपलब्धिविषयं ७.१.६.१३
आत्मौपम्येन भूतानि ६.२९.२३४
आत्मौपम्येन सर्वत्र १.१.१८.२०१
आत्यंतिके तु संहारे २.६.३.४०
आत्रेयोऽर्चनानसख्या ३.२.९.९६
आत्रेयो देवशर्मेति २.४.१३.६
आत्रेयोर्मांडिलश्चैव ३.२.३९.२४
आथर्वणश्चतुर्थस्तु ६.२०२.१३
आथर्वणेन सूक्तेन जातं ६.१३२.१५
आथर्वः प्रथमः प्रश्नो ६.२०२.१४
आदत्त सहसा गौरी १.२.११.४८
आददानं श्रिया दत्तं १.२.३८.७९
आदरस्तेषु वै राज ६.१४.३२
आदरादनुयुंजानं शिष्यं १.४.४.७
आदर्शं दर्शयित्वाऽथ २.९.२९.१६
आदाय चोर्वशीं भूयो ५.३.१९३.६३
आदाय गनया चेयं २.१.३.२५
आदाय तुलसीमूल २.५.२.५
आदाय धनुषी दिव्ये ५.१.२७.५६
आदाय पुजकस्तानि २.१.९.३६
आदाय परया प्रीत्या ३.२.३०.८३
आदाय मल्लिकामालां २.१.८.२१
अदाय सलिलं हस्ते ६.१३९.७
आदाय स्वर्णकमलं २.१.५.४५
आदाय स्वपुरं तूर्णं ३.१.२१.४४
आदायदायबहुशोधनं ४.१३.४१
आदायनाराध्यभवंत ४.९८.३१